वा चापि शोधयेत् । खटिका(खरी)(स्फटिका)(फट्किरी) सिन्धुजन्म सैन्धवम् । वल्मीकम् (वल्मीकमाटी) क्षारलवणम् (खारिलोण)भाण्डरञ्जकमृत्तिका(काविसा)। एभिश्चूर्णैर्युतं सूतं यावद्यामं विमर्दयेत् । तच्चूर्णसहितं सूतं स्थालीमध्ये परिक्षिपेत् । तस्याः स्थाल्यामुखे स्थालीमपरां धारयेत् समाम् । सवस्त्रमृत्तिकया मुद्रयेदनयोर्मुखम् । संशोष्य मुद्रयेद्भूयोभूयः संशोष्य मुद्रयेत् । सम्यग्विशोष्य मुद्रां तां स्थालीं चुल्ल्यां विधारयेत् । अग्निं निरन्तरं दद्याद्यावद्दिनचतुष्टयम् । अङ्गारोपरि तद्यन्त्रं रक्षेद्यत्नादहर्निशम् । शनैरुद्घाटयेद्यन्त्रमूर्द्ध्वस्थालीगतं रसम् । कर्पूरवत् सुविमलं गृह्णीयाद्गुणवत्तरम् । तदेव कुसुमचन्दनकस्तूरीकुङ्कुमैर्युक्तम् । खादन् हरति फिरङ्गव्याधिं सोपद्रवं सपदि । विन्दति वह्निदीप्तिं पुष्टिं वीर्य्यं बलं विपुलम् । रमयति रमणीशतकं रसकर्पूरस्य सेवकः सततम्” ।

**कर्पूरस्तव** पु० कर्पूरशब्दघटितः स्तवः । “कर्पूरं मध्यमान्त्यस्वरपरिरहितम्” इत्यादिके तन्त्रोक्ते श्यामास्तवभेदे ।

**कर्पूरा** स्त्री कप–खर्जू० ऊर–लत्वाभावः । हरिद्राभेदे । “दार्वी सेदारुसम्बा च सुरभी दारुदारु च । कर्पूरा पद्मपत्रा स्यात् सुरीमत् सुरतावका:” भावप्र० तत्पर्य्यायः । मदनपाले तु हरिद्रायाः पञ्चधा विभागमुक्त्वा तद्गुणा उक्ताः, यथा “दार्वी दारुहरिद्रा स्यात् पीतदारु च पञ्चधा । कटङ्कटेरी पीतद्रुः स्वर्णवर्णा कटङ्कटो । दार्वी तद्वद्विशेषात्तु मूत्रकर्णास्यरोगनुत्” ।

**कर्पूरिन्** त्रि० कर्पूरोऽस्त्यस्य इनि । कर्पूरयुक्ते ततः सुवास्वा० चतुरर्थ्याम् अण् । कार्पूर तस्यादूरभवदेशादौ त्रि० ।

**कर्फर** पु० कीर्य्यते विच् फल्यते फलः प्रतिविम्बः कः कीर्य्यमाणः फलः प्रतिविम्बं यत्र लस्य रः । दर्पणे जटाधरः तत्र हि प्रतिविम्बस्य पतनात् तस्य तथात्वम् ।

**कर्ब गतौ** भ्वा० पर० सक० सेट् । कर्बति अकर्बीत् । चकर्ब ।

**कर्बु** पु० कर्ब–उ । १चित्रवर्णे २तद्वति त्रि० “अनन्ता रश्मयस्तस्य दीपवद्यः स्थितो हृदि । सिताः सिताः कर्बुनीलाः कपिलाः पीतलोहिताः” याज्ञ० । स्वार्थे कन् तत्रार्थे

**कर्बुदार** पु० कर्बुः सन् दारयति मलं दृ–णिच्–अच् कर्म्म० । १कोविदारवृक्षे २श्वेतकाञ्चने च रत्नमा० ३नीलझिण्ट्यां शब्दच० । “कोविदारकर्बुदारारिष्टेत्यादि” सुश्रु० । तस्य तैलन्तु मधुरम् । “पियालकर्बुदारस्तूर्य्यं वल्लीनपुसैर्वारुककर्कारुकुष्माण्डप्रभृतीनां तैलानि मधुराणि” सुश्रु० । “अथ यूथिकेत्याद्युपक्रमे कर्बुदारकोविदारप्रभृतीनि “कषायस्वादुतिक्तानि रक्तपित्तहराणि च । कफघ्नान्यनिलं कुर्य्युः संग्राहीणि लघूनि च” इति सुश्रुतेन कोविदारादस्य भेदस्य निर्द्देशात् ततोऽस्य भेदः इति बोध्यम् ।

**कर्बुदारक** पु० कर्बुः सन् दारयति कफं दृ–णिच्–ण्वुल् । श्लेष्मान्तकवृक्षे राजनि० ।

**कर्बुर** पु० कर्ब–गतौ मद्गुरा० उरच् । १चित्रवर्णे शवले इतरवर्णेन सह संपर्कादस्य तथात्वम् । २तद्वति त्रि० “पवनैर्भस्म कपोतकर्बुरम्” कुमा० । ओष्ठमध्योऽप्ययं बवयोरभेदात् दन्त्यमध्योऽपीति शब्दचि० । ३पापे नरकादिगतिहेतुत्वात्तस्य तथात्वम् । ४नादेयनिष्पावधान्ये राजनि० कर्बुरवर्णत्वात्तस्य तथात्वम् । ५जले न० मेदि० नीचगतित्वात्तस्य तथात्वम् । कर्व–दर्पे, मद्गुरा० उरच् दन्त्यमध्यः । ६स्वर्णे न० मेदि० इतरधातुभ्यस्तस्योत्कर्षेण दर्पयोगात्तथात्वम् । वन्नामनामके ७धुस्तूरे च अम० । ८शठ्याम् अमरटीका ९राक्षसे पु० अमरे पाठान्तरम् दर्पयुक्तत्वात्तस्य तथात्वम् । १०कृष्णपुष्पिकायां (पारुल) स्त्री टाप् मेदि० ११वर्वरायां (वावुइ तुलसी) स्त्री जटा० गौरा० ङीष् कर्बुरी । १२दुर्गायां स्त्री त्रिका० ।

**कर्बुरफल** पु० कर्बुरं फलमस्य । साकरुण्डवृक्षे राजनि० ।

**कर्बू(र्वू)र** पु० कर्ब–गतौ कर्व–दर्पे वा खर्जूरा० ऊर । १राक्षसे उणा० । २शठ्यां च अमरः ३कर्चूरे (कावा) हरिद्रायाम् शब्दर० । भावप्र० कर्च्चूर इत्येव पाठः । ४स्वर्णे ५हरिताले न० शब्दचि० वैजयन्त्याम् कर्चूरमिति पाठः कर्चूरशब्दे उदा० । ६चित्रवर्णे पु० ७तद्वति त्रि० अमरटीका स्वार्थे कः । कर्बूरकस्तत्रार्थेषु ।

**कर्म्मकर** त्रि० कर्म करोति भृत्यः कृ–ट । वेतनेन कर्मकारके स्त्रियां ङीप् । “प्रोचुः प्राञ्जलयः स्त्रियः वयं कर्मकरीस्तुभ्यम्” भाग० २,२२,२६ । जसः स्थाने शस् आर्षः । ताच्छील्ये ट । २दासे कर्मकरणशीले “चिकित्सकौ कर्मकरौ कामरूपसमन्वितौ । लोके चरन्तौ मर्त्यानां कथं सोममिहार्हतः ?” भा० व० १२४ अ० । “नाभुक्तवति नास्नाते नासंविष्टे च भर्त्तरि । न संविशामि नाश्नामि सदा कर्मकरेष्वपि” भा० व० २३२ । स्त्रियां ङीप् । कृ–हिंसायां सन् कर्म हिंसां करोति हेत्वादौ ट । ३यमे पु० मेदि० । सर्वप्राणिहिंसायां तस्याधिकृततया च तस्य तथात्वम् । ४मूर्वालतायाम् स्त्री मेदि० । कर्मकरस्य दासभेदस्तस्य भेदकर्मादिकं मिता० नारदेनोक्तं यथा । “शुश्रूषकः पञ्चविधः शास्त्रे दृष्टोमनीषिभिः । चतुर्विधः